श्री सुब्रह्मण्य मालामंत्रः

श्री सुब्रह्मण्य मालामंत्रः

ॐ अस्य श्रीसुब्रह्मण्यमालामहामंत्रस्य, ब्रह्मा ऋषिः, गायत्री छंदः, श्रीसुब्रह्मण्यः कुमारो देवता, श्रीं बीजं, ह्रीं शक्तिः, क्लीं कीलकं, मम सर्वाभीष्टसिद्ध्यर्थे जपे विनियोगः ||

करन्यासः –
ॐ श्रीं ह्रीं क्लीं कुमाराय अंगुष्ठाभ्यां नमः |
ॐ श्रीं ह्रीं क्लीं शरवणभवाय तर्जनीभ्यां नमः |
ॐ श्रीं ह्रीं क्लीं कार्तिकेयाय मध्यमभ्यां नमः |
ॐ श्रीं ह्रीं क्लीं मयूरवाहनाय अनामिकाभ्यां नमः |
ॐ श्रीं ह्रीं क्लीं स्कंदाय कनिष्ठिकाभ्यां नमः |
ॐ श्रीं ह्रीं क्लीं सुब्रह्मण्याय करतलकरपृष्ठाभ्यां नमः |
अंगन्यासः –
ॐ श्रीं ह्रीं क्लीं कुमाराय हृदयाय नमः |
ॐ श्रीं ह्रीं क्लीं शरवणभवाय शिरसे स्वाहा |
ॐ श्रीं ह्रीं क्लीं कार्तिकेयाय शिखायै वषट् |
ॐ श्रीं ह्रीं क्लीं मयूरवाहनाय कवचाय हुं |
ॐ श्रीं ह्रीं क्लीं स्कंदाय नेत्रत्रयाय वौषट् |
ॐ श्रीं ह्रीं क्लीं सुब्रह्मण्याय अस्त्राय फट् |
भूर्भुवस्सुवरोमिति दिग्बंधः |

ध्यानं |
बालार्कायुतसन्निभं शिखिरथारूढं च षड्भिर्मुखैः
भास्वद्द्वादशलोचनं मणिमयैराकल्पकैरावृतं |
विद्यापुस्तकशक्तिकुक्कुटधनुर्बाणासिखेटान्वितं
भ्राजत्कार्मुकपंकजं हृदि महासेनान्यामाद्यं भजे ||

लमित्यादि पंचपूजा |

ॐ श्रीं ह्रीं क्लीं नमो भगवते रुद्रकुमाराय अष्टांगयोगनायकाय महार्हमणिभिरलंकृताय क्रौंचगिरिविदारणाय तारकसंहारकारणाय शक्तिशूलगदाखड्गखेटकपाशांकुशमुसलप्रासाद्यनेक चित्रायुधालंकृत द्वादशभुजाय हारनूपुरकेयूरकटककुंडलादिविभूषिताय सकलदेवसेनासमूहपरिवृताय महादेवसेनासम्मोहनाय सर्वरुद्रगणसेविताय सकलमातृगणसेविताय रुद्रगांगेयाय शरवणसंभवाय सर्वलोकशरण्याय, सर्वरोगान् हन हन, दुष्टान् त्रासय त्रासय, सर्वभूतप्रेतपिशाचब्रह्मराक्षसान् उत्सारय उत्सारय, अपस्मारकुष्ठादीन् आकर्षय आकर्षय भंजय भंजय, वातपित्तश्लेष्मज्वरामयादीन् आशु निवारय निवारय, दुष्टं भीषय भीषय, सर्वलुंठाकादीन् उत्सादय उत्सादय, सर्वरौद्रं तनुरुत्सारय उत्सारय, मां रक्ष रक्ष, भगवन् कार्तिकेय प्रसीद प्रसीद |

ॐ नमो भगवते सुब्रह्मण्याय महाबलपराक्रमाय क्रौंचगिरिमर्दनाय सर्वासुरप्राणापहरणाय इंद्राणीमांगळ्यरक्षकाय त्रयस्त्रिंशत्कोटिदेवतावंदिताय महाप्रळयकालाग्निरुद्रकुमाराय दुष्टनिग्रहशिष्टपरिपालकाय वीरमहाबलसर्वप्रचंडमारुतमहाबलहनुमन्नारसिंह वराहादिसमस्तश्वेतवराहसहिताय इंद्राग्नियम निर्ऋतिवरुणवायुकुबेरेशानाद्याकाशपाताळदिग्बंधनाय सर्वचंडग्रहादिनवकोटिगुरुनाथाय नवकोटिदानवशाकिनी डाकिनी वनदुर्गापीडाहरी कालभैरवी गंडभैरवी फूं फूं दुष्टभैरवीसहित भूतप्रेतपिशाचवेताळ ब्रह्मराक्षसादिदुष्टग्रहान् भंजय भंजय, षण्मुख वज्रधर समस्तग्रहान् नाशय नाशय, समस्तरोगान् नाशय नाशय, समस्तदुरितं नाशय नाशय, ॐ रं ह्रां ह्रीं मयूरवाहनाय हुं फट् स्वाहा | ॐ सौं श्रीं ह्रीं क्लीं ऐं सौं नं कं सौं शरवणभव |

अथ कुमारतंत्रे सुब्रह्मण्यमालामंत्रः ||

ॐ सुं सुब्रह्मण्याय स्वाहा | ॐ कार्तिकेय पार्वतीनंदन स्कंद वरद वरद सर्वजनं मे वशमानय स्वाहा | ॐ सौं सूं सुब्रह्मण्याय शक्तिहस्ताय ऋग्यजुः सामाथर्वणाय असुरकुलमर्दनाय योगाय योगाधिपतये शांताय शांतरूपिणे शिवाय शिवनंदनाय षष्ठीप्रियाय सर्वज्ञानहृदयाय षण्मुखाय श्रीं श्रीं ह्रीं क्षं गुह रविकंकालाय कालरूपिणे सुरराजाय सुब्रह्मण्याय नमः |
ॐ नमो भगवते महापुरुषाय मयूरवाहनाय गौरीपुत्राय ईशात्मजाय स्कंदस्वामिने कुमाराय तारकारये षण्मुखाय द्वादशनेत्राय द्वादशभुजाय द्वादशात्मकाय शक्तिहस्ताय सुब्रह्मण्याय ॐ नमः स्वाहा |

उत्तरन्यासः ||
करन्यासः –
ॐ श्रीं ह्रीं क्लीं कुमाराय अंगुष्ठाभ्यां नमः |
ॐ श्रीं ह्रीं क्लीं शरवणभवाय तर्जनीभ्यां नमः |
ॐ श्रीं ह्रीं क्लीं कार्तिकेयाय मध्यमभ्यां नमः |
ॐ श्रीं ह्रीं क्लीं मयूरवाहनाय अनामिकाभ्यां नमः |
ॐ श्रीं ह्रीं क्लीं स्कंदाय कनिष्ठिकाभ्यां नमः |
ॐ श्रीं ह्रीं क्लीं सुब्रह्मण्याय करतलकरपृष्ठाभ्यां नमः |

अंगन्यासः –

ॐ श्रीं ह्रीं क्लीं कुमाराय हृदयाय नमः |

ॐ श्रीं ह्रीं क्लीं शरवणभवाय शिरसे स्वाहा |

ॐ श्रीं ह्रीं क्लीं कार्तिकेयाय शिखायै वषट् |

ॐ श्रीं ह्रीं क्लीं मयूरवाहनाय कवचाय हुं |

ॐ श्रीं ह्रीं क्लीं स्कंदाय नेत्रत्रयाय वौषट् |

ॐ श्रीं ह्रीं क्लीं सुब्रह्मण्याय अस्त्राय फट् |

भूर्भुवस्सुवरोमिति दिग्विमोकः |

इति श्रीसुब्रह्मण्यमालामंत्रः ||